श्री हंसविजयजी जैन लायब्रेरी ग्रन्थमाला. नं० १०

शीलमाहात्म्यगर्भपञ्चमीतपोविषये

# ॥ श्रीशीलवतीसतीकथानकम् ॥

पूज्यमुनिवर्य–श्रीयुतहंसविजयमहाराजशिष्यरत्नपन्न्यासश्रीसंपद्विजयोपदिष्ट–जामनगर-
वास्तव्यओसवालज्ञातीयश्रेष्ठिजेठाभाइगोविंदजीश्रेयोर्थं हठिसिंहभाइदत्तद्रव्य-
साहाय्येन प्रकाशयित्री श्रीहंसविजयजैनलायब्रेरी–अमदावाद.

इदं पुस्तकं शा. जेसंगभाइ छोटालाल सुतरीया सेक्रेटरी–श्री हंसविजय जैन लायब्रेरी
इत्यनेन मेनेजर पटेल लक्ष्मीचंद हीराचंद श्री अंबिकाविजय प्री. प्रेस ढालगरवाडा
अमदावादद्वारा मुद्रयित्वा प्रकाशितम्.

वीरनिर्वाण–२४४६. प्रथमावृत्तिः प्रतयः १०००. विक्रमार्क १९७६.

## कांइ वक्तव्य

प्रस्तुत शीलवती सती कथानकमां शुद्ध हार्दिक भावनापूर्वक निर्मळ शीलव्रत पाळनथी तेमज पंचमी तिथि आराधनथी इहलोक तेमज परलोकने विषे सुरूपता कुलीनता सद्बुद्धि संपन्नता आदि अने छेवटे मुक्ति सुखोनी पण प्राप्ति थाय छे ते संबंधमां वर्णन करवामां आव्युं छे.

ग्रंथांतर्गत आ लघुकथाना मुद्रणथी केटलाकोने एम लागवुं स्वाभाविक छे के आवी कथाओ पृथक् छपाववामां शी उपयोगीता ? परंतु जगत् स्वभावनी विचित्राने लइ विचित्र रुचि जनसमुदाय होय छे, अने तेज कारणथी आ लघुकथा ग्रंथ लघुरुचि जनसमूहने आनंददायी अवश्य थशे. आवा प्रकारनो जनसमूहनो विचित्रताने लक्ष्यमां राखी कविवर भवभूतिए पोताना नाटकमां "उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा" आ सूक्तनो प्रयोग कर्यो छे.

आ पुस्तक प्रकाशनना शुभ कार्य माटे परमपूज्य महाराज श्री हंसविजयजीना शिष्यरत्न पंन्यासजी श्री संपद्विजयजीना सदुपदेशथी जामनगर निवासी वीसा ओसवाळ ज्ञातीय शेठ जेठाभाइ गोविंदजीना श्रेय माटे तेमना सुपुत्रे द्रव्यनी साहाय करी छे. अने तेओना आ शुभ कार्यनुं अनुमोदन करी विरमीए छीए.

अमदावाद.
१९७८ भादरवा शुदि १०.

लि. संघ सेवकः—शा. जेसंगलाल छोटालाल
सेक्रेटरी श्री हंसविजयजी जैन लायब्रेरी.

॥ अर्हम् ॥

॥ श्रीमद्विजयानन्दसूरिपादपद्मेभ्यो नमः ॥

# ॥ श्रीशीलवतीकथानकम् ॥

हरति कुलकलंकं लुम्पते पापपंकं, सुकृतमुपाचिनोति श्लाघ्यतामातनोति। नमयति सुरवर्गं हन्ति दुर्गोपसर्गं, रचयति शुचि शीलं स्वर्गमोक्षौ सुलीलम् ॥१॥ गुरुराह दयाहेतुं, ब्रह्मचर्यं जनो भजेत् । यस्मान्मैथुनसंज्ञाया–मुक्तो जीववधो जिनैः ॥२॥ सलिलं ज्वलनोऽपि गोष्पदं, जलनाथोऽप्यचलोऽपि जायते । समभूर्विषमप्यलं सुधा–ऽहिरपि स्रग् वरशीलधारिणाम् ॥३॥ स्फुरेत्तेषां यशः सौख्य–भारं तेऽश्नुवते नराः । विमलं पालयन्तीह, शीलं शीलवतीव ये ॥ ४॥ जम्बूद्वीपाभिधद्वीप–मौलिमाणिक्यमण्डनम् ।

Scanned by CamScanner

॥ १ ॥

अस्ति श्रीनन्दनपुरं, स्वःपुरं किल भूतले ॥ ५ ॥ यत्र स्फाटिकहर्म्याग्रो-च्छलत्कान्ति-
कदम्बकैः । हस्यमान इव व्योम्नि, क्षीयते क्षणदापतिः ॥६॥ तत्रारिमर्दनो राजा,
यस्य विष्टपमण्डपे । यशश्चन्द्रोदयः स्फार तारविच्छित्तिभाग् बभौ ॥७॥ मान्यस्तस्य
सदाचारः, श्रेष्ठी रत्नाकराभिधः । श्रीनामधेया तज्जाया, निरपायगुणोदया ॥ ८ ॥
श्राद्धधर्ममनाबाधं, पालयन्नयमायतौ । सुखहेतुं चिरेणापि, न लेभे पुत्रसन्ततिम् ॥ ९ ॥
पुत्राभावान्महादुःख–पीडिता श्रीरथान्यदा । श्रीः श्रेष्ठिनमभाषिष्ट, शिष्टाचाराविरोधिनी
॥१०॥ चैत्याग्रे जिननाथस्य, स्वामिन्नुपवने पुरः । देवी व्यक्तमहाशक्ति–रास्तेऽजितब-
लाभिधा ॥११॥ सा च पुत्रानपुत्राणां, निर्द्धनानां धनानि च । दुर्भगानां च सौभाग्या-
न्याधत्ते सेविता सती ॥१२॥ पुनः–अभज्जाण भज्जं अभुज्जाण भुज्जं, अरज्जाण रज्जं
अविज्जाण विज्जं । असुक्खाण सुक्खं अचक्खूण चक्खुं, सरोयाण रोयक्खयं देइ एसा
॥१३॥ तदार्यपुत्र ! तस्यास्त्व–मुपयाचितुमर्हसि । पुत्रार्थे हि विधीयन्ते, स्वप्राणा अप्यु-

॥ १ ॥

Scanned by CamScanner

पायनं ॥१४॥ तेनापि तत्तथा चक्रे, जातश्च तनयोत्तमः। भाग्ययोगात् फलन्त्येव, काले
स्वाराधिताःक्रियाः ॥१५॥ अथ जन्मोत्सवादूर्ध्वं, देवीमाहात्म्यसूचिकाम्। चक्रेऽजितसेन
इति, तस्याख्यां द्वादशेऽहनि ॥ १६ ॥ क्रमाद्बाल्यमतिक्रम्य, सम्प्राप्तो यौवनश्रियम्।
शिश्रिये स्पर्धयेवासौ, सरस्वत्या श्रियापि च ॥ १७ ॥ तस्यानुरूपकन्यायै, श्रेष्ठी रत्ना-
करस्ततः। चिन्तां चकार शास्त्रार्थ–सन्देह इव बुद्धिमान् ॥ १८ ॥ कन्यामात्मगुणै-
स्तुल्यां, यद्येष मम नन्दनः। न लभेत ध्रुवं तत्स्याद्, व्यर्थः स्रष्टुरुपक्रमः ॥ १९ ॥
यतः–निर्विशेषः प्रभुः पार–वश्यं दुर्विनयोऽनुगः। दुष्टा च भार्या चत्वारि, मनःशल्यानि
देहिनाम् ॥२०॥ इतश्च व्यवसायार्थं, तेनैव प्रहितः पुरा। कोऽप्यभ्येत्य वणिक्पुत्र-
स्तदन्तिकमुपाविशत् ॥२१॥ व्यवहारस्वरूपं च, स पृष्टः श्रेष्ठिना कृती। आयव्यययुतं
सर्वं, व्याजहार यथाविधि ॥२२॥ किञ्चाहं जग्मिवान् क्लृप्त–मंगलायां महापुरि। श्रेष्ठिना
जिनदत्तेन, व्यवहारोऽभवन्मम ॥२३॥ भोजनायान्यदा तेना–भ्यर्थितस्तद्गृहेऽगमम्।

Scanned by CamScanner

अद्राक्षं कन्यका तत्र, स्वर्गाद् भ्रष्टां सुरीमिव ॥२४॥ केयमित्यहमद्राक्षं, ततो विस्मित-मानसः । श्रेष्ठी प्राह तनूजेयं, मम चिन्तेव देहिनी ॥ २५ ॥ यतः—किं प्राप्स्यति वरं श्रेष्ठं ?, तादृष्टा किं भविष्यति ?। किमसौ श्वसुरादीन् वा, स्वगुणै रञ्जयिष्यति ? ॥२६॥ पालयिष्यति किं शीलं?, प्रसविष्यति किं सुतम् ? । श्वसुरादिकवर्गोऽस्याः, कथं वा तोषयिष्यति ? ॥२७॥ सुधवत्वं भवेदस्याः, सपत्न्यो मा भवन्तु च। यातरो मास्म दुष्येयुः, चिन्ता मूर्त्तेव कन्यका ॥ २८ ॥ एषा च गुणमाणिक्य—रोहणाचलभूमिका । पक्षिशब्दान्तसर्वांगि—भाषाविज्ञानदक्षिणा ॥२९॥ कन्येयं शीलवत्याख्या, ख्याता रूपकला-गुणैः । तदस्यां योग्यजामातृ—चिन्ता मे बाधतेतराम् ॥३०॥ मयोक्तं देव! मा चिन्तां, कुरु श्रीनन्दने पुरे । अस्या योग्यो वरो ह्यस्ति, रत्नाकरसुतोऽजितः ॥३१॥ जिनदत्तोऽभ्यधाद्भद्र !, साधु साधु त्वयोदितम् । वरचिन्तोदधौ मग्नो, भवताद्य समुद्धृतः॥३२॥ उक्त्वेत्यजितसेनस्य, दातुं शीलवतीं सुताम् । जिनशेखरनामानं, प्रजिघाय निजं सुतम्

॥ ३३ ॥ सोऽप्यत्रैव मया सार्द्ध–मागतोऽस्ति धियांनिधिः । इतिकर्त्तव्यता तस्मात्, श्रेष्ठिन्नादिश्यतां मम ॥ ३४ ॥ श्रेष्ठी प्राह महाभाग !, साध्वेवोपकृतं त्वया । जातश्च सर्वलाभेभ्यो, महालाभोऽयमेव मे ॥३५॥ ससत्कारमथाहूतः, श्रेष्ठिसूर्जिनशेखरः । ददावजितसेनस्य, यामिं शीलवतीं मुदा॥३६॥ययावजितसेनोऽपि, सार्धं तेनैव तां पुरीम् । परिणीय महद्धर्या च, समियाय निजं गृहम् ॥३७॥ स तया गृहलक्ष्म्येव, स्वगोत्रामृत-कुल्यया । त्रिवर्गसारं गार्हस्थ्य-धर्मं चिरमपालयत् ॥३८॥ शिवाशब्दमथाकर्ण्या–न्यदा शीलवती सती । निशीथे निर्गता गेहाद्, घटमादाय मूर्धनि॥३९॥ तदानीं श्वसुरस्तस्याः, कामिन्येव जरद्गवः । निद्रया दूरतस्त्यक्तः, तां ददर्श महासतीम् ॥४०॥ विकल्पो-दधिनिर्मग्नः, चेतस्येवमचिन्तयत् । कुशीलां कलयाम्येना–ममीभिर्लक्षणैर्वधूम् ॥४१॥ सद्गोत्रजा अपि घन–रसकल्लोलसंकुलाः। प्रायः स्त्रियो भवन्त्येव, निम्नगा इव नीचगाः ॥४२ एताः स्वार्थपरा नार्यो, बहिरेव मनोहराः । अत्यन्तदारुणाश्चान्तः, स्वर्णाक्त-

Scanned by CamScanner

क्षुरिका इव ॥४३॥ शीलवत्यपि निर्मोया, किञ्चित्कार्यमनिन्दितम् । घटं मुक्त्वा पुनः प्राप्ता, स्वतल्पमविकल्पितम् ॥४४॥ पयस्यलाबुवच्चिन्ता—शतपातुकधीरिमा । सोत्सुकं रजनीशेषे, श्रेष्ठी जायामभाषत ॥४५॥ वधूः शीलगुणैर्वृद्धे ! कीदृशी प्रतिभाति ते ? । तयोक्तं कुलमर्यादा—नुरूपं चेष्टतेऽखिलम् ॥४६॥ नान्तर्मुखी शेमुषी ते—ऽज्ञे! मन्ये यन्मया निशि। वीक्षितैकाकिनी क्वापि, रन्तुमद्य गता वधूः ॥४७॥ तत्समस्तप्रमाणेभ्यो, बलीयोऽध्यक्षमेव हि । जानीहि सकलंकां तत्, वधूं चन्द्रतनूमिव ॥ ४८ ॥

इतश्चाजितसेनोऽपि, पितुः पादनिनंसया । समेतस्तत्र तेनाथ, सखेदमिव भाषितः ॥ ४९ ॥ किमिह प्रोच्यते वत्स !, विधात्रास्मद् गृहांगणे । रोपिता न च सेहे च, पारिजातकवल्लरी ॥ ५० ॥ यत्तादृग्वंशजातापि, गुणसंसर्गवत्यपि । कौटिल्यं भजते चापलतिकेव वधूरियम् ॥५१॥ सलज्जमजितोऽप्याह, जिनधर्मरताप्यसौ । चेष्टते दुष्टचारत्वं, हतास्तदखिला गुणाः॥५२॥ जाने वत्स!वधूरासीत्, कल्पवल्लीव नः कुले । साम्प्रतं दृष्ट- ॥ ३ ॥

Scanned by CamScanner

दोषात्तु,विषवल्लेर्विशेष्यते॥५३॥किञ्च–को नाम स्त्रीषु विश्वासः?, श्वासस्येव शरीरिणाम्। स्वार्थैकवशतः शील–मासां विद्युल्लतायते ॥ ५४ ॥ यदुक्तम्–न बध्यन्ते गुणैः पत्युः, न लक्ष्यन्ते परीक्षकैः। न धनेन च धार्यन्ते, शीलत्यागोद्यताः स्त्रियः ॥५५॥ शास्त्रेषु श्रूयते यत्तु, यच्च लोकेषु गीयते। संवादयन्ति दुःशीलं, तन्नार्यः कामविह्वलाः ॥५६॥ निशीथेऽद्य गता क्वापि, नीराहरणदम्भतः। यामेन पुनरप्यागात्, जाग्रतो मे वधूरियम् ॥५७॥ अवेहि तदिमां वत्स !, दुर्वृत्तां त्यजनोचिताम्। गुर्वादेशपराधीन–स्तथेत्युक्त्वा गतः सुतः ॥ ५८ ॥ श्रेष्ठी कूटप्रयोगेण, तस्याः प्रातरजज्ञपत्। त्वामाह्वयति ते तातो, वत्से ! मिलितुमुत्सुकः ॥५९॥ ज्ञात्वा रात्रिविकल्पं तं, विदग्धा शीलवत्यपि। अनुमाने परीक्षायां, किं जात्यं हेम कम्पते ? ॥६०॥ स्यन्दनं प्रगुणीकृत्य, शीलवत्या समन्वितः। स्वयं रत्नाकरः श्रेष्ठी, चचाल कृतमंगलम् ॥६१॥ मार्गे नद्यामुपेतायां, श्रेष्ठी शीलवतीं जगौ। पादत्राणे परित्यज्य, वत्से ! सञ्चर पाथसि ॥६२॥ किञ्चिद्विचार्य साप्यन्त–स्ते

Scanned by CamScanner

दृढीकृत्य पर्यधात् । मेने च दुर्विनीतां तां, श्रेष्ठी प्राग्धृतकश्मलः ॥६३॥ पुरः फलितमालोक्य, मुद्गक्षेत्रं जगावसौ। अहो! शस्यश्रियः क्षेत्र—स्वामिनः करगोचराः॥६४॥ स्नुषाऽभाणीदेवमेत—न्न जग्धं यदिदं पुरा । श्रेष्ठी दध्यावसम्बद्ध—प्रलापिन्यप्यसाविति ॥६५॥ एतस्यां वामचारित्वा—नुरूपं कृतवानिति । मुदितो द्रुतसम्पातं, श्रेष्ठी रथमचालयत् ॥६६॥ समृद्धया धनदद्रंग—सरंगं जनसंकुलम् । पुरः पुरमथोद्वीक्ष्य, शश्लाघ मूर्द्धधूननात् ॥६७॥ तयापि व्यापिबुद्धयोचे, साध्विदं यदि नोद्वसम् । श्रेष्ठिनाऽचिन्ति सोल्लुंठगीर्मामपि हसत्यसौ ॥६८॥ अग्रेऽथ भटमालोक्य, प्रहारभरजर्जरम् । श्रेष्ठी श्लाघितवानस्य, सौंडीर्यं साधु साध्विति ॥६९॥ विलोक्य तमथो प्राह, मधाविव पिकी वधूः । साध्वस्ति कुट्टितस्तावत्, पामरः श्वेव कातरः॥७०॥ प्रतिकूला वधूर्नूनं, मदुक्ते दुष्टचारिणी । प्रत्यक्षेऽपि विरुद्धार्थ—मुन्मत्तेवाभिधत्त या ॥ ७१ ॥ भावयन्निति तत्त्याग—कर्म चाप्यनुमोदयन् । न्यग्रोधपादपाधस्तात् , क्वापि श्रेष्ठी स्थितः पथि ॥७२॥ वधूरपि वट-



Scanned by CamScanner

च्छायां, परिहृत्य सुदूरतः । आतपे पटमावृत्य, तस्थौ स्थिरमतिप्रभा ॥ ७३ ॥ श्रेष्ठी प्राह जिनदत्तां–गजे ! छायामुपाश्रय । श्रुत्वाऽप्यश्रुतकेनेव, साऽस्थाद् गजनिमीलया ॥७४॥ अहो ! वारितवामेयं, न शिक्षार्हा कुशिष्यवत् ।इत्युपेक्ष्य स्वयं तस्थौ, तच्छायात-सुखासिकः ॥ ७५ ॥ ततः क्वापि गतः श्रेष्ठी, कर्बटे तत्र गत्वरीः । कुटीस्त्रिचतुरा वीक्ष्य, ग्रामं दुस्थमुदाहरत् ॥ ७६ ॥ ततः शीलवती किंचिद्, विमृश्य मतिमद्वरा । जनता-संकुलं स्थान–मिदमित्युच्चकैर्जगौ ॥७७॥ सर्वथा विपरीतेयं, कुशिक्षिततुरंगवत् । इति यावद् विषण्णात्मा, श्रेष्ठी चेतस्यचिन्तयत् ॥ ७८ ॥ तावता मातुलस्तस्या-स्तमभ्येत्य सगौरवम् । श्रेष्ठिनं स्वगृहे नीत्वा, भोजनाद्यैरुपाचरत् ॥ ७९ ॥ साग्रहं स्थाप्यमानोऽपि, तेन श्रेष्ठी तु सोत्सुकः । प्रतस्थे सवधूकस्त-त्क्लृप्तवस्त्रादिसत्कृतिः ॥ ८० ॥ सम्प्राप्तप्रा-न्तर वृक्ष–च्छायायाममुचद्रथम् । भुक्त्वा तदुपरि श्रेष्ठी, क्षणं श्रान्तश्च सुप्तवान् ॥८१॥ वधूरपि पितुर्गेहं, ततोऽभ्यर्णं विजानती । शुभाचारा स्वकर्मोत्ति–हृष्टा भोक्तुमुपाविशत्

Scanned by CamScanner

॥८२॥ करीरस्तम्बमारूढ—स्तावता करटोऽरटत् ।तद्भाषामुपलभ्येह,किं रे!करकरायसे ? ॥८३॥ श्रुत्वेति चिन्तयामास, श्रेष्ठी वातकिनी ह्यसौ । दुराचारा नराभावाद्, भाषते शकुनैरपि ॥८४॥ काके करम्भकालोक—जातोत्कण्ठे रटत्यलम् । विमृश्यावसरं दूरं, सती निःशंकमाख्यत ॥ ८५ ॥ वियुक्ता दुर्नयेनाहं, पत्युरेकेन रे द्विक ! पित्रोरपि द्वितीयेन, कृतेन न मिलामि तु ॥८६॥ जागरूकस्ततः श्रेष्ठी, साभिप्रायमिदं वचः । श्रुत्वा पप्रच्छ किं वत्से ! दुःखिन्येवेत्युदीर्यते॥८७॥ साऽभ्यधाद्वच्मि नो किञ्चित्, श्रेष्ठी प्राह श्रुतं मया । निर्बन्धात् तेन पृष्टा सा, जगौ निःशंकमानसा ॥८८॥ ततोऽहं वच्मि यत्किञ्चित्, तत्सत्यं त्वमवेहि वै । दोषाय मे गुणा एव, जाताश्चन्दनवद्यतः ॥८९॥ छेदोद्घर्षणमातप-प्रसहनं यन्निर्दयोन्मूलनं, तीक्ष्णैकक्रकचेन पाटनमहो ! यद्भोगिभिर्वेष्टनम् ।कष्टं चन्दन-पादपेन युगपत्प्राप्तं गुणेभ्यः फलं, केषांचिद् गुणिनां गुणो विधिवशात्क्लेशाय नाशाय च ॥ ९० ॥ बाल्ये बन्धूपरोधेन, सर्वशास्त्रशिरोमणि । अहमध्येयि मूढात्मा, शास्त्रं



Scanned by CamScanner

पक्षिरुताह्वयम् ॥९१॥ गिरा गारुडिकस्येव, सर्पदष्ट इव क्षणात् । उत्थाय रथतः श्रेष्ठी, द्रुतं तत्पार्श्वमीयिवान् ॥९२॥ तदाहं हंत निर्भाग्या, निशीथे तव जाग्रतः । श्रुत्वा गोमायुकान्ताया, ध्वनितं द्रुतमुत्थिता ॥९३॥ घटमादाय मूर्ध्नाऽगां, नदीं तीर्त्वा च तेन ताम् । अर्दां मृतकमाकृष्य, शिवायै जलमध्यतः ॥ ९४ ॥ तत्कटीतटसंटंकी–न्यादायाभरणान्यहम् । अनर्घ्याणि घटे क्षिप्त्वा, क्षिप्रं स्वगृहमागमम् ॥९५॥ निरवातानि महीपीठे, सन्ति तानि तथैव च । अनेन दुर्नयेनाह–मियतीं भुवमासदम् ॥ ९६ ॥

काकस्तु वक्त्यसौ स्वर्ण-दशलक्षमितं निधिम् । करीराधःस्थितं लात्वा, करम्बं देहि मेऽधुना ॥९७॥ तदहं वच्मि रे काक!, दुर्विपाकमिदं वचः। मा पुनः पुनराचक्ष्व, क्षते क्षारमिवात्र मे ॥९८॥ ततः ससम्भ्रमं शीर्षं, कम्पयन् स्थविरो जगौ । किं वत्से! सत्यमप्येतत्, साऽवदत् संशयोऽत्र कः ?॥९९॥ श्रेष्ठी तु चिन्तयामास, पश्यामि क्षणमात्रतः। करस्थे कंकणे यद्वा, क्रियते दर्पणेन किम् ? ॥१००॥ततः परिकरं बद्ध्वा, वृद्धस्तरुणवत्तदा॥

अयःकुद्दालमादत्त, करे कमललीलया ॥१॥ काकाय स्वजनायेव, दापयित्वा करम्बकम्।
स्वयं खनितुमारेभे, करीरस्तम्बमादरात् ॥२॥ प्रादुरासन् स्वर्णकुम्भाः, शीलवत्या गुणा
इव । तस्या दोषा इव क्षिप्ता, भूम्यन्तस्तेन रेणवः ॥ ३ ॥ अहो! मूर्त्तिमती लक्ष्मी-
रेवासौ मद्गृहे वधूः । काचभ्रान्त्या मरकत–मिवावगणिता मया ॥ ४ ॥ ध्यायन्निति
रथे स्वर्ण–कलशान् सत्वरं न्यधात् । क्षमयामासिवांस्तां च, स्वापराधप्रकाशनात्॥५॥
अभिनन्दतु वधूमेष, सद्मस्थद्रव्यसोत्सुकः । स्यन्दनं वालयामास, जितकासीव युद्धतः
॥६॥ वधूराख्यादितोऽभ्यर्णा, मेवमेऽस्ति पितुर्गृहम् । तत्तातः पित्रोः संगन्तु, मुचितो-
ऽवसरो वासौ ॥७॥ व्यावर्तस्वाग्रहादस्मात्, कुलमुज्ज्वलयाधुना । रथमारोह मे वत्से,
द्राग् पूरय मनोरथान् ॥ ८ ॥ सापि श्वसुरदाक्षिण्या, दक्षचित्ता तथाकरोत् । श्रेष्ठी तु
खेटयामास, रथं प्रमुदिताशयः ॥९॥ तत् पूर्वं भाणित स्सर्व, समन्वानः सकारणं पर्वतो
पत्यकावास, ग्रामपार्श्वे समागतः ॥१०॥ जगाद मधुरं वत्से, न ते निर्हेतुकं वचः

उद्वसस्तदयं ग्रामः, कथमूचे जनाकुलः? ॥११॥ साऽऽख्यत ख्यातमेवेदं, तात ! स्थानेन किं ? जनः। यत्रास्ति स्वजनः कोऽपि, तच्छून्यमपि सुंदरम् ॥१२॥ भवंतमागतं श्रुत्वा, यदत्र मम मातुलः । यच्चकार तथा तेना–स्माकं तेन जनाकुलः ॥ १३ ॥ ततो हेतु–शताश्लिष्टं, चाणक्यस्येव जल्पितम् ॥ वध्वा व्यवसितं सर्वं, साभिप्रायमसौ विदन् ॥ १४ ॥ क्रमेण संगतो मार्ग–जुषो वटतरोस्तले ॥ वधूं पप्रच्छ किं वत्से !, छायाऽस्य मुमुचे तदा ? ॥१५॥ युग्मम् ॥ साऽऽह श्वसुर ! किं नेदं, श्रुतपूर्वमपि क्वचित् ?॥ वायसश्चेद्व-टारूढो, वनिताशिरसि स्रवेत् ॥१६॥ षण्मासाभ्यन्तरे पत्यु–स्तदापायो भवेन्महान् ॥ वृक्षमूले च सर्पादि–भवाद्या दोषराशयः ॥ १७ ॥ युग्मम् ॥ तदस्तापायमाचीर्णे, वरं स्वाधीनकर्मणि ॥ परिहृत्य वटच्छाया–मतोऽस्थामहमातपे ॥ १८ ॥ साधु साधु कुला-धारे !, सर्वभावविचक्षणे ! ॥ वृद्धत्वेन वयं वीत–मतयो बोधितास्त्वया ॥१९॥ श्लाघ-मानो वधूमित्थं, त्रपमाणः स्वकर्मणा ॥ पुनः पप्रच्छ किं वीरः, सुकुट्टित इतीरितः ? ॥ २० ॥ अभ्यधत्त वधूस्तात !, तत्प्रहारा न सम्मुखाः ॥ प्रहारैः पृष्ठगैरेव, प्रणश्यन्

Scanned by CamScanner

कुट्टितो ह्यसौ ॥ २१ ॥ श्रुत्वा चमत्कृतः श्रेष्ठी, तन्मत्या पुनरब्रवीत् ॥ पत्तनं श्लाघ्य-
मेवैतत्, कथमुद्वसमभ्यधाः? ॥२२॥ सावदत् सुवसेनापि, पत्तनेन किमत्र नः?। यत्र स्व-
स्वजनो नास्ति, यो दृष्ट्वाऽऽलापयत्यपि ॥ २३ ॥ यतः–स्वभावस्नेहसांद्रेण, विनैकेन
प्रियात्मना ॥ जनाकुलमपि क्षोणी–पीठमाभात्यरण्यवत् ॥ २४ ॥ सत्यमूचे महा-
भागे!, मुद्गक्षेत्रमिदं कथम् ॥ परिपाकदशापन्न–मपि जग्धमुदाहरः? ॥ २५ ॥ व्याजहार
ततो हारि–हारहूरानुकारगीः ॥ मुग्धा विदग्धगम्यार्थ, पश्य तातात्र संमुखम् ॥ २६ ॥
भ्रामं भ्रामं कच्छभूमौ, कर्षकोऽसावितस्ततः ॥ रक्षानपेक्षया शम्बाः, स्वैरमश्नाति
यद् द्रुतम् ॥२७॥ तद् ध्रुवं द्रव्यमादत्त, वृद्धयासौ व्यवहारिणः ॥ तेनात्र निरपेक्षात्मा,
पूर्वं जग्धमतोऽब्रवम् ॥ २८ ॥ तमाकार्य ततः श्रेष्ठी, स्वयं पप्रच्छ विस्मितः ॥ वृद्धया-
ऽदायि मया पूर्वं, जग्धमित्याह सोऽपि तम् ॥२९॥ अखिलं पुनरुत्पन्न–मिदं साधुर्महीष्यति ॥ प्रयासफलमेवेदं, ममेत्युक्त्वा जगाम सः ॥ ३० ॥ भूयोऽप्राक्षीन्नदीं दृष्ट्वा,
श्रेष्ठी वत्से! जलांतरे ॥ संचरन्त्या त्वया नोपा–नहौ मुक्ते तदत्र किम् ?॥ ३१॥ तत्र

कंटककीटादे–र्भयं दृष्टेरगोचरे ॥ को नामाल्पकृते काय–मपाये तात ! पातयेत्? ॥३२॥
इत्यादि पुत्रजायोक्त–युक्तिप्रीणितमानसः ॥ क्रमात् प्राप गृहं श्रेष्ठी, प्रेक्ष्यमाणः पुरी-
जनैः ॥ ३३ ॥ दर्शितानि ततो वध्वा, गृहीत्वाऽऽभरणानि च ॥ तुष्टस्तदखिलं वृत्तं,
जगाद सुतजाययोः ॥ ३४ ॥ सर्वस्वस्वामिनी सैव, श्रेष्ठिना स्थापिता ततः ॥ तत्-
कृत्यैश्च गृहं प्राप, नित्यं नवनवाश्रयम् ॥ ३५ ॥ चलत्वादायुषः श्रेष्ठी, कालधर्मं गतः
क्रमात् ॥ छायेव पादपं सद्यः, श्रेष्ठिन्यपि तमन्वगात् ॥३६॥ कुटुंबनायकत्वेन, स्थापितः
स्वजनैस्ततः ॥ गृहस्थधर्ममजित–सेनश्चिरमपालयत् ॥ ३७ ॥ इतश्च मीलितैकोन–
मंत्रिपंचशतोऽन्यदा । विशिष्टधिषणं कंचि–च्चिकीर्षुर्मंत्रिणं परम् ॥३८॥ अरिमर्दनभूपालः,
प्रत्येकं नागरान् जगौ ॥ यो मां निहंति पादेन, को दंडस्तस्य युज्यते?॥३९॥ युग्मम्॥ सर्वे
ऽप्यूचुः शिरच्छेदं, सर्वदंडं च सोऽर्हति ॥ तच्छ्रुत्वाऽजितसेनोऽपि, शीलवत्यै न्यवेदयत्
॥४०॥चतुर्विधमहाबुद्धि-निधानं साप्यदोऽवदत् । सर्वांगाभरणव्रातं, दत्त्वा संतोष्यतेऽसकौ
॥४१॥कथमित्यनुयुक्ताऽऽह, विदग्धा कः प्रियां विना । तमाहंतुमपीहेत?, तद् राज्ञे सोऽप्य-

Scanned by CamScanner

वोचत ॥४२॥ संतुष्टो भूपतिस्तं च, मुख्यं सकलमंत्रिषु। मंत्रिणं स्थापयामास, धर्मकर्मैक-सूत्रिणम् ॥ ४३ ॥ पर्यंतदेशभूपालं, सिंहनामानमन्यदा । सद्योऽभ्यषेणयद् राजा, गृहीत्वा षड्विधं बलम् ॥४४॥ ततश्चाजितसेनोऽपि, चिंताचांतमना मनाग् । शीलवत्या महासत्या, पृष्टः स्पष्टमभाषत ॥ ४५ ॥ यद्यपि त्वं सुशीलाऽसि, तथाप्येकाकिनीं गृहे । विहाय सह भूपेन, यियासोर्मे न निर्वृतिः ॥४६॥ साप्याह राजकार्याणि, कर्तव्यानि यथा तथा । शीलं तु मम शक्रोऽपि, नैव खंडयितुं क्षमः ॥४७॥ प्रत्ययार्थं तथा चेयं, पुष्पमालां गलेऽस्तु ते । सुशीलां विद्धि मामेना–मम्लानां यावदीक्षसे ॥४८॥ इत्युक्त्वा स्वगुण-श्रेणि–मिव तत्कंठकंदले । पुष्पमालां निचिक्षेप, हृष्टः सोऽपि ततोऽचलत् ॥४९॥ गज-मदजलवर्षासिक्तभूरश्वपादो––द्धतबहलरजोभिः पूरिताभ्रोतुल्यः ॥ धवल–रथपताकोद्यद्बलाकोऽथ तूर्य–ध्वनिगुरुतरगार्जिस्तद्भिदे राट् चचाल ॥ ५० ॥ गतः कांचिदरण्यानीं, नृपः कुसुमवर्जिताम् । ददर्शाजितसेनस्य, कंठे मालां विकस्वराम् ॥५१॥ कुतोऽसाविति भूपेन, पृष्टो मंत्री स्फुटं जगौ । नित्यमस्तीयमम्लाना, प्रियाशील-



Scanned by CamScanner

प्रभावतः ॥५२॥ उक्त्वेति स्वाश्रयं प्राप्ते, सचिवे कौतुकी नृपः । पुरः स्वनर्मपात्राणां, तदुवाच विवेकधीः ॥५३॥ ततः कामांकुरः प्राह, कुतः शीलं मृगीदृशाम् । ललितांगोऽवद्देव!, सत्यं कामांकुरोदितम्॥५४॥रतिकेलिरभाषिष्ट, संशयः कोऽत्र देव! ते?। अशोकः प्राह संदेहं, हंतुं प्रहिणु मामिह ॥ ५५ ॥ ततः शीलवतीशील–भ्रंशनाय कुतूहली । दत्त्वा बहु धनं प्रैषी–दशोकं स्वनरं नृपः ॥ ५६ ॥ विधृतानेकनेपथ्यः, प्राप्तोऽसौ नंदने पुरे । शीलवत्या गृहासन्नं, स्थानमादाय तस्थिवान् ॥ ५७ ॥ एषोऽपि पंचमोद्गार-मुद्गिरन् भंगुरांगकः । संचचार पुरस्तस्या, वक्त्रवीक्षणदक्षिणः ॥ ५८ ॥ बहुप्रकारान् कुर्वाणं, विकारान् वीक्ष्य तां सतीम् । दध्यौ शीलवतीमसौ, शील ध्वंसं चिकीर्षति ॥ ५९ ॥ नूनमिच्छति मूढोऽसौ, क्रष्टुं केशरिकेसरान् । विविक्षति हतस्वान्तः, सुहुतं वा हुताशनम् ॥६०॥ पश्यामि कौतुकं तावत्, किमसौ चेष्टते कुधीः ?। ध्यात्वेत्यपांगकोणेन, प्रवृत्ता तं विलोकितुम्॥६१॥अशोकोऽपि विशंकात्मा, सिद्धमर्थं विशंक्य तम् । दूतीं प्रस्थापयामास, सापि तामित्थमाख्यत ॥६२॥ भद्रे! तव गतो भर्ता, समं राजास्पदां-

Scanned by CamScanner

तरे । वनपुष्पमिवैतत्ते, तारुण्यं याति निष्फलम् ॥६३॥ भाग्यैरिव तवाकृष्टः, सुभगे ! तत् पुमानयम् । राजमान्योऽनुरागी च, संगं कामयते तव ॥६४॥ साप्याह फलसादातुमुचितं यौवनश्रियः । कुलस्त्रीणां न युज्येत, किंत्वन्यनरसंगमः ॥ ६५ ॥ किंचैतदप्याचर्यंत, लभ्यते चेन्मनीषितम् । फलाभक्ष्यमपि स्नेह—लोभेन स्यात् फलेग्रहिः ॥६६॥ तयोचे तत् कियन्मात्रं, याचसे? साप्यवोचत । ददातु सांप्रतं मे—ऽर्धलक्षं प्रगुणताकृते ॥ ६७ ॥ एत्वर्धलक्षमादाय, पंचमेऽह्नि पुनः स्वयम् । पूरयामि यथापूर्णा—मस्य कांचित्सुखासिकाम् ॥६८॥ न्यवेदयदशोकाय, मुदिता दूतिकापि तत् । तद्दत्तमर्धलक्षं च, शीलवत्यै समार्पयत् ॥६९॥ ततोऽपवरकस्यांतः, सुबुद्धिः शीलवत्यपि । प्रच्छन्नं खनरैर्गर्तां, खानयामास मांसलाम् ॥ ७० ॥ सोत्तरच्छदमव्यूतं, पर्यंकं तदुपर्यधात् । पंचमेऽह्नि ततः सोऽर्धं, लक्षमादाय सोन्मदः ॥ ७१ ॥ तांबूलहस्तः सौभाग्या—न्मन्वानः तृणवज्जगत् । समेत्योपाविशंस्तत्र, गर्तान्तः सहसाऽपतत् ॥ ७२ ॥ युग्मम् ॥ रज्जुबद्धशरावेण, ददती भोजनोदके । नरकोर्व्यां जीवमिव, तं तत्रास्थापयत् सती ॥७३॥ मास-

मात्रे व्यतिक्रांते, राजाऽऽल्यन्नर्ममंत्रिणः । सिद्धार्थः किमसिद्धार्थो, नाशोकस्तावदागतः? ॥७४॥ भूपेन पुनरादिष्टो, वितीर्य द्रविणं ततः । रतिकेलिचिकीस्तस्यां, रतिकेलिरथागमत् ॥ ७५ ॥ तयैकलक्षमादाय, सोऽपि तत्रैव पातितः । बुद्धेर्हि सुप्रयुक्तायाः, किमसाध्यमपि क्वचित् ? ॥७६॥ एवं लक्षमुपादाय, प्रत्येकमुभयोरपि । कामांकुरललितांगा—वपि साऽपातयत् क्रमात् ॥७७॥ चातुर्गतिकसंसार—दुःखानीव महासती । पाताले पातयामास, चतुष्पुरुषदंभतः ॥ ७८ ॥ अथ शत्रुं विनिर्जित्य, राजा सिंहरथाभिधम् । प्रविवेश पुरं पौरैः, कृतमंगलमालिकम् ॥७९॥ तेऽथ शीलवतीं प्रोचु—र्दीनास्याः पीडिताः क्षुधा । अनात्मज्ञा नरा यत्स्यु—रस्मद्दुःखभाजनम् ॥ ८० ॥ न दृष्टं तव माहात्म्यं, अस्मानादेशकारिणः । निष्काशयैकदाऽमुष्मा—न्नरकादिव कूपतः ॥८१॥ तयोचे चेद्यथादिष्टं, वचनं मे करिष्यथ । तदा मोक्ष्यामि तैरूचे, यत्कर्तव्यमथादिश ॥८२॥ एवं भवत्विति यदा, ब्रवीम्यहमशंकितम् । भवद्भिरपि वक्तव्या, भवत्वेवं तदेति वाक् ॥८३॥ शिक्षयित्वेति तान्नाथ—मूचेऽथ मतिमत्तमा । निमंत्र्यैकदा भूपं, स्वगेहे सपरिच्छदम्

Scanned by CamScanner

॥ ८४ ॥ तथैव विहिते तेन, समेतस्तत्र भूपतिः । मुक्तावचूलोल्लोचादि-विस्तारद्योतिताम्बरे ॥८५॥ तया भोजनसामग्री, प्रच्छन्ना विदधेऽखिला । उपविष्टश्च भूपालो, भोक्तुं सारपरिच्छदः ॥ ८६ ॥ दध्यौ च दृश्यते तावन्न, कश्चिद् भोजनोद्यमः । निमंत्रिता वयं चैते, तत् किमेतदिहाद्भुतम् ? ॥८७॥ततः शीलवती गर्त-द्वारमागत्य सादरम् । कुसुमादिभिरभ्यर्च्य, प्रोच्चैकरब्रवीदिदम् ॥८८॥ भो भोः ! रसवती सर्वा, यक्षाः ! संपद्यतां द्रुतम् । अस्त्वेवमिति तैरुक्ते, प्रादुश्चक्रे तयाऽथ सा ॥८९॥ भोजनं विदधे राजा, कौतुकाक्षिप्तमानसः । अपराऽपि हि सामग्री, प्राप्ता तदभिलापतः ॥९०॥ तांबूलवस्त्रालंकारै-श्चतुर्लक्षव्ययात् तदा । एवमस्त्विति तद्वाक्या-ऽनंतरं सत्कृतो नृपः ॥९१॥ सिद्धिः काचिदपूर्वेयं, यद् गर्तोद्‌गतवाक्यतः । सर्वं जातमिति ध्यात्वा-ऽपृच्छत् शीलवतीं नृपः ॥९२॥ भद्रे ! किमिदमाश्चर्यं ?, तयोचे देव ! मद्‌गृहे । असिध्यन् यक्षाश्चत्वार-स्तेभ्यः सम्पद्यतेऽखिलम् ॥९३॥ ततः शीलवतीं राजा, सत्कृत्य वसनादिभिः । कृत्वा तां भगिनीं यक्षान्, ययाचे बहुमानतः ॥ ९४ ॥ जीवितव्यमपि स्वामिं-स्त्वदीयमिदमावयोः । यक्षाणां

का कथा ? तस्मात्, ढौकिष्यन्ते प्रभोः पुरः ॥९५॥ प्रतिज्ञायेति सा कूपा—न्निष्काश्यै-
तानसिस्नपत्। परितः कुसुमालीढा—नलिप्त हरिचंदनैः ॥९६॥ ततो रत्नकरंडेषु, निक्षिप्य
चतुरोऽपि तान्। रथेष्वारोपयामास, धूपोत्क्षेपपुरस्सरम् ॥९७॥ दिगन्तव्यापिभिस्तूर्य-
निर्घोषैरथ मंत्रिराट्। प्रतस्थे तानुपादाय, कारयन् प्रेक्षणीयकाम् ॥९८॥ नृपः संमुख-
मागत्य, बहुमानपुरस्सरम्। करस्थमिव मन्वानो, जगत्तान् स्वगृहेऽनयत् ॥९९॥ तदा रस-
वतीपाकात्, सूपकारान् न्यवारयत्। भूपो यदद्य दास्यंति, यक्षा नो दिव्यभोजनम् ॥२००॥
भोजनावसरेऽभ्यर्च्य, राजा यक्षकरंडकान्। जगाद जायतां भोज्य—मेवमस्त्विवाति तेऽ-
ब्रुवन् ॥१॥ यावदूर्ध्वमुखं प्रेक्ष—माणानां सर्वदेहिनाम्। पुरो न किंचन प्रादु—र्भूतं भूतो-
दितादिव॥२॥विलक्षात्मा ततो राजा, समुद्घाट्य करंडकान्। ग्लानेंद्रियान् विदीर्णास्यान्,
ददर्श चतुरो नरान् ॥३॥ प्रेतानिव करालास्यान्, निरीक्ष्य सहसा नृपः। नामी यक्षाः किंतु
यातु—धाना उक्त्वेत्यपासरत् ॥४॥ तैरप्यूचे रयादेव, न यक्षा न च राक्षसाः। कामांकु-
रादयः किंतु, त्वन्नर्मसचिवा वयं ॥ ५ ॥ सम्यग् निरीक्षिता भूपे—नोपलक्ष्य बभाषिरे।

शीलवती- भद्राः! केयमवस्था वः, काकानामिव रोगिणाम्? ।६।यथावृत्तः स्ववृत्तांतः, तैरप्यूचे क्रमादथ। कथानकम्
राजा शीलवतीशीलं, शश्लाघे धूनयन् शिरः ॥७॥ आकार्याऽऽख्यदहो ! बुद्धि–कौशलं ते
॥ ११ ॥ पतिव्रते ! । शीलपालनयत्नेना–मुष्या श्लाघा न कस्यचित् ॥८॥ अम्लानया तदा पुष्प-
मालयैव मया स्फुटम् । ज्ञातं ते शीलमाहात्म्य–मज्ञानाद्यदिदं कृतम् ॥९॥ तत् क्षंतव्यं न
कोपोऽत्र, कार्यो बंधुसमे मयि । सापि तं बोधयामास, जिनधर्मोपदेशतः ॥१०॥ परदारा-
निवृत्तिं च, कारिता नर्ममंत्रिणः । सत्कृत्य प्रेषिता राज्ञा, सती स्वगृहमासदत् ॥ ११ ॥
विशिष्याजितसेनोऽपि, राजकार्यधुरंधरः । शीलवत्या समं धर्म-सारं कालमवाहयत् ॥१२॥
तत्रागतश्चतुर्ज्ञानी, दमघोषाभिधो मुनिः । ययावजितसेनोऽपि, तं नंतुं वल्लभायुतः ॥१३॥
देशनांते मुनिः शील–वर्ता भाषितवान् गुरुः । भद्रे ! पूर्वभवाभ्यासाद्, भाति ते शील-
मुज्ज्वलम् ॥१४॥ कथमजितसेनेन, पृष्टः प्रांजलिना गुरुः । ऊचे कुशपुरे स्थाने, श्रावकः
सुलसाभिधः ॥१५॥ तद्भार्या सुयशा गेहे, तयोर्दुर्गतनामकः । प्रकृत्या भद्रको भृत्य-
स्तद्भार्या दुर्गिला पुनः ॥ १६ ॥ सार्धं सुयशसाऽन्येद्युः, यतिनीवसतिं ययौ । दुर्गिला ॥ ११ ॥

Scanned by CamScanner

स्वामिनीं वीक्ष्य, पुस्तकार्चनसादराम्॥१७॥आर्ये! किमद्य पर्वेति, सा पप्रच्छ प्रवर्तिनीम्।
तयोचेऽद्य श्रुततिथि–विख्याता श्वेतपंचमी ॥ १८ ॥ य इह श्वेतपंचम्या–मुपवास-
परायणः । पुस्तकाभ्यर्चनपूर्वं, कुर्यात् ज्ञानप्रभावनाम् ॥ १९ ॥ स प्रेत्य सुखसौभाग्य-
भाग्यबुद्ध्यादि वैभवम् । प्राप्य क्रमेण निर्वाणं, लभते शुद्धशीलयुक् ॥२८॥ युग्मम् ॥
श्रुत्वेति दुर्गिला प्राह, धन्यासौ स्वामिनी मम। निंद्या तु मादृशी यत्र, स्वहितं कर्तुमक्षमा
॥२१॥ प्रवर्तिन्याह चेद्दान–तपसी ते न गोचरे । तत् स्वाधीनं भावसारं, शीलं त्वमपि
पालय ॥ २२ ॥ विधेहि परपुंत्यागं, यावज्जीवं विवेकिनि !। तथाष्टमीचतुर्दश्योः,
स्वभर्तुरपि वर्जनम् ॥ २३ ॥ गृहीत्वाभिग्रहं दृष्ट्वा, सापि पत्युरभाषत । कर्मलाघवतः
सोऽपि, तमाद्रियत भावतः ॥ २४ ॥ क्रमेण प्रापतुस्तौ च, सम्यक्त्वं भावशुद्धितः ।
दुर्गिलापि क्रमाज्ज्ञान–पंचम्या विदधे तपः ॥ २५ ॥ कालधर्मं गतौ जातौ, सौधर्मे
त्रिदशावुभौ । भवानजितसेनोऽपि, दुर्गजीवस्ततश्च्युतः ॥ २६ ॥ जातश्च दुर्गिला-
जीवः, सैषा शीलवती सती । ज्ञानाराधनपुण्येन, विशिष्टबुद्धिवैभवाः ॥ २७॥ जाति-

Scanned by CamScanner

स्मृत्या ततः सर्वं, स्वयमेव विबुध्य ते । परं वैराग्यमापन्नौ, जग्रहाते व्रतं द्रुतम् ॥२८॥

प्रपाल्य चारित्रधुरं चिराय, तौ प्रापतुः पंचमदेवलोकम् ।
ततश्च्युतौ केवलमाप्य सिद्धिं, व्रजिष्यतो निर्मलशीलयोगात् ॥२९॥

यतः—काएण बंभचेरं, धरंति भव्वा उ जेण सुद्धमणा ।
कप्पंमि बंभलोए, ताणं नियमेण उववाओ ॥ ३० ॥

॥ इति शीले शीलवतीकथानकम् ॥



Scanned by CamScanner